विशेषः। त्वगुपकारकः। स च त्रिविधः। उष्णः। शीतः। अनुष्णाशीतः। पृथिव्याः स्पर्शः काठिन्यादिः पाकजः। जलपरमाणुस्पर्शः नित्यः। अन्यत्रानित्यः। वैशेषिकमते पार्थिवपरमाणुमात्रस्य पाकजस्पर्शः। नैयायिकमते तु द्व्यणुकादिस्पर्शोऽपि पाकजः। यथा,—

"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः।
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः॥
काठिन्यादिः क्षिताविव नित्यतादि च पूर्व्ववत्।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्॥
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये।
नैयायिकानान्तु नये द्व्यणुकादावपीष्यति॥"
इति भाषापरिच्छेदः॥

स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वाय्वोः स्पर्शोऽनुष्णाशीतः जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शः पृथिव्या एव इत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्व्ववत् जलतेजोवायुपरमाणुस्पर्शा नित्याः इत्यर्थः। तद्भिन्नाः स्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकरससंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते नीरे सौकरमौष्ण्यञ्च नयव्यतिरेकाभ्यामुपाधेरेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् पृथिवीष्वपि मध्ये परमाणाविव रूपादीनां पाकः इति वैशेषिका वदन्ति। नैयायिकानामिति नैयायिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति। इति सिद्धान्तमुक्तावली॥ * ॥

पुराणमते एकादशविधस्पर्शो यथा। उष्णः १ शीतः २ सुखः ३ दुःखः ४ स्निग्धः ५ विशदः ६ खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १० गुरुः ११। इति महाभारते मोक्षधर्म्मः॥ कठिनः। इति तत्रैव आश्वमेधिकपर्व्व॥ आचमनाङ्गस्पर्शनं आचमनशब्दे द्रष्टव्यम्॥ * ॥ उच्छिष्टस्य स्पर्शनिषेधो यथा,—

"न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणानलान्।
न चानलं पदा वापि न देवप्रतिमां स्पृशेत्॥"
इति कौर्म्मे उपविभागे। १६। ३५॥

अथ उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। आपस्तम्बः।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्॥
गायत्त्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्।
त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुध्यति॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा॥"

प्राजापत्यं स्नाने। अर्द्धोच्छिष्टो येन आद्यग्रासः आस्ये निःक्षिप्तः न तु निगीर्णः। दक्षः।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः।
स्पर्शनं यदि गच्छेत्तु शवोदक्यान्त्यजैः सह॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥"

काश्यपः।

"श्वशूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः।
यद्युच्छिष्टः स्पृशेत् तत्र कृच्छ्रं सान्तपनं चरेत्॥"

एतज्ज्ञानाभ्यासे। सान्तपने धेनुद्वयम्। ब्रह्मपुराणे।

"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥"

अनुच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम्। काश्यपः।

"रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रनिराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्वजातिषु॥"

एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्त्वदर्द्धं नक्तव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्त्वदर्द्धं एतच्चतुर्थाहानन्तरं कर्त्तव्यम्।

"चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निशान्तु व्यतिक्रम्य स्वजात्युक्तन्तु कारयेत्॥"
इति वचनान्तरदर्शनात्॥

एतत् कामतः। अत्र दिनभेदोऽपि नास्ति। अज्ञाने बृहस्पतिः।

"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥"

चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्व्वम्। व्याघ्रः।

"रजस्वला यदा स्पृष्टा श्वजम्बुकखरैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥"

अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था। वृद्धशातातपः।

"रजस्वले तु ये नार्य्यावन्योऽन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम्॥"

पञ्चगव्यपानं व्रतकृतं तेनोपवासः। ब्रह्मकूर्च्चमाह जाबालः।

"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातः ब्रह्मकूर्च्चविधिः स्मृतः॥"

तदशक्तौ पुराणैकं दातव्यम्। उच्छिष्टशूद्रादिस्पर्शे बृहस्पतिः।

"शुना चोच्छिष्टया शूद्रा संस्पृष्टा द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत्॥"

परतश्चतुर्थदिने स्नानात् पूर्वमिति ज्ञेयम्। इति प्रायश्चित्ततत्त्वम्॥ मृतप्रसूतोक्तास्पृश्यस्पर्शनप्रायश्चित्तं स्नानशब्दे द्रष्टव्यम्॥ (त्रि, स्पर्शकः। आनन्दजनकः। यथा, भागवते। ३। २१। ९।

"श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम्॥")

स्पर्शकः, त्रि, (स्पृशतीति। स्पृश + ण्वुल्।) स्पर्शनकर्त्ता। स्पृशधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः॥

स्पर्शनं, क्ली, (स्पृश + ल्युट्।) दानम्। स्पर्शः। इति मेदिनी॥ (यथा, भागवते। १। १०। १२।

"तस्मिन्नस्तधियः पार्थाः सहेरन् विरहं कथम्।
दर्शनस्पर्शनालापशयनासनभोजनैः॥"

स्पर्शः। इति मल्लिनाथः॥ यथा, रघुवंशे। २। ५०।

"तदद्य कल्याणपरम्पराणां
भोक्तारमूर्जस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः॥")

स्पर्शनः, पुं, (स्पृशतीति। स्पृश + ल्युः।) वायुः। इत्यमरः। १। १। ६४॥

स्पर्शमणिः, पुं, (स्पर्शप्रधानो मणिः। स्पर्शेन स्वर्णोत्पादकत्वात् तथात्वम्।) स्पर्शमात्रेण स्वर्णजनकप्रस्तरविशेषः। परशपातर इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

स्पर्शमणिप्रभवं, क्ली,(स्पर्शमणिः प्रभवो यस्य।) स्वर्णम्। इति शब्दरत्नावली॥

स्पर्शलज्जा, स्त्री, (स्पर्शात् लज्जा संकोचनरूपत्रपा यस्याः।) लज्जालुवृक्षः। इति शब्दचन्द्रिका॥

स्पर्शशुद्धा, स्त्री, (स्पर्शे शुद्धा।) शतमूली। इति शब्दचन्द्रिका॥

स्पर्शस्यन्दः, पुं, (स्पर्शेन स्यन्दते मूत्रयतीति। स्यन्द + अच्।) भेकः। इति केचित्॥

स्पर्शा, स्त्री, (स्पृशति परपुरुषमिति। स्पृश + अच्। टाप्।) कुलटा। इति धरणिः॥

स्पर्शानन्दाः, स्त्री, (स्पर्शेन आनन्दो यासाम्।) अप्सरसः। इति त्रिकाण्डशेषः॥

स्प्रष्टा, [ऋ] त्रि, (स्पृशतीति। स्पृश + तृच्।) उपतापकमात्रम्। रोगः। इत्येके। इत्यमरटीकायां भरतः। ३। २। १४॥

स्पश, ज ग्रन्थवाधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ञ, स्पशति स्पशते। पस्पाश। ग्रन्थस्थाने स्पर्शनं पठन्ति केचित्। इति दुर्गादासः॥